श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ तृतीयः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ तृतीयः सर्गः ॥

## विश्रवसो वैश्रवणस्योत्पत्तेस्तपसो वरप्राप्तेर्लङ्कायां निवासस्य च वर्णनम्

अथ पुत्रः पुलस्त्यस्य विश्रवा मुनिपुङ्गवः।
अचिरेणैव कालेन पितेव तपसि स्थितः॥ **7.3.1** ॥

सत्यवाञ्शीलवान् दान्तः स्वाध्यायनिरतः शुचिः।
सर्वभोगेष्वसंसक्तो नित्यं धर्मपरायणः॥ **7.3.2** ॥

ज्ञात्वा तस्य तु तद् वृत्तं भरद्वाजो महामुनिः।
ददौ विश्रवसे भार्यां स्वसुतां देववर्णिनीम्॥ **7.3.3** ॥

प्रतिगृह्य तु धर्मेण भरद्वाजसुतां तदा।
प्रजान्वीक्षिकया बुद्ध्या श्रेयो ह्यस्य विचिन्तयन्॥ **7.3.4** ॥

मुदा परमया युक्तो विश्रवा मुनिपुङ्गवः।
स तस्यां वीर्यसम्पन्नमपत्यं परमाद्भुतम्॥ **7.3.5** ॥

जनयामास धर्मज्ञः सर्वैर्ब्रह्मगुणैर्वृतम्।
तस्मिञ्जाते तु संहृष्टः स बभूव पितामहः॥ **7.3.6** ॥

दृष्ट्वा श्रेयस्करीं बुद्धिं धनाध्यक्षो भविष्यति।
नाम चास्याकरोत् प्रीतः सार्धं देवर्षिभिस्तदा॥ **7.3.7** ॥

यस्माद् विश्रवसोऽपत्यं सादृश्याद् विश्रवा इव।
तस्माद् वैश्रवणो नाम भविष्यत्येष विश्रुतः॥ **7.3.8** ॥

स तु वैश्रवणस्तत्र तपोवनगतस्तदा।
अवर्धताहुतिहुतो महातेजा यथानलः॥ **7.3.9** ॥

तस्याश्रमपदस्थस्य बुद्धिर्जज्ञे महात्मनः।
चरिष्ये परमं धर्मं धर्मो हि परमा गतिः॥ **7.3.10** ॥

स तु वर्षसहस्राणि तपस्तप्त्वा महावने।
यन्त्रितो नियमैरुग्रैश्चकार सुमहत्तपः॥ **7.3.11** ॥

पूर्णे वर्षसहस्रान्ते तं तं विधिमकल्पयत्।
जलाशी मारुताहारो निराहारस्तथैव च॥ **7.3.12** ॥

एवं वर्षसहस्राणि जग्मुस्तान्येकवर्षवत्।
अथ प्रीतो महातेजाः सेन्द्रैः सुरगणैः सह॥ **7.3.13** ॥

गत्वा तस्याश्रमपदं ब्रह्मेदं वाक्यमब्रवीत्।
परितुष्टोऽस्मि ते वत्स कर्मणानेन सुव्रत॥ **7.3.14** ॥

वरं वृणीष्व भद्रं ते वरार्हस्त्वं महामते।
अथाब्रवीद् वैश्रवणः पितामहमुपस्थितम्॥ **7.3.15** ॥

भगवन् लोकपालत्वमिच्छेयं लोकरक्षणम्।
अथाब्रवीद् वैश्रवणं परितुष्टेन चेतसा॥ **7.3.16** ॥

ब्रह्मा सुरगणैः सार्धं बाढमित्येव हृष्टवत्।
अहं वै लोकपालानां चतुर्थं स्रष्टुमुद्यतः॥ **7.3.17** ॥

यमेन्द्रवरुणानां च पदं यत् तव चेप्सितम्।
तद् गच्छ बत धर्मज्ञ निधीशत्वमवाप्नुहि॥ **7.3.18** ॥

शक्राम्बुपयमानां च चतुर्थस्त्वं भविष्यसि।
एतच्च पुष्पकं नाम विमानं सूर्यसन्निभम्॥ **7.3.19** ॥

प्रतिगृह्णीष्व यानार्थं त्रिदशैः समतां व्रज।
स्वस्ति तेऽस्तु गमिष्यामः सर्व एव यथागतम्॥ **7.3.20** ॥

कृतकृत्या वयं तात दत्त्वा तव वरद्वयम्।
इत्युक्त्वा स गतो ब्रह्मा स्वस्थानं त्रिदशैः सह॥ **7.3.21** ॥

गतेषु ब्रह्मपूर्वेषु देवेष्वथ नभस्तलम्।
धनेशः पितरं प्राह प्राञ्जलिः प्रयतात्मवान्॥ **7.3.22** ॥

भगवन् लब्धवानस्मि वरमिष्टं पितामहात्।
निवासनं न मे देवो विदधे स प्रजापतिः॥ **7.3.23** ॥

तं पश्य भगवन् कञ्चिन्निवासं साधु मे प्रभो।
न च पीडा भवेद् यत्र प्राणिनो यस्य कस्यचित्॥ **7.3.24** ॥

एवमुक्तस्तु पुत्रेण विश्रवा मुनिपुङ्गवः।
वचनं प्राह धर्मज्ञ श्रूयतामिति सत्तम॥ **7.3.25** ॥

दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्वतः।
तस्याग्रे तु विशाला सा महेन्द्रस्य पुरी यथा॥ **7.3.26** ॥

लङ्का नाम पुरी रम्या निर्मिता विश्वकर्मणा।
राक्षसानां निवासार्थं यथेन्द्रस्यामरावती॥ **7.3.27** ॥

तत्र त्वं वस भद्रं ते लङ्कायां नात्र संशयः।
हेमप्राकारपरिखा यन्त्रशस्त्रसमावृता॥ **7.3.28** ॥

रमणीया पुरी सा हि रुक्मवैदूर्यतोरणा।
राक्षसैः सा परित्यक्ता पुरा विष्णुभयार्दितैः॥ **7.3.29** ॥

शून्या रक्षोगणैः सर्वै रसातलतलं गतैः।
शून्या सम्प्रति लङ्का सा प्रभुस्तस्या न विद्यते॥ **7.3.30** ॥

स त्वं तत्र निवासाय गच्छ पुत्र यथासुखम्।
निर्दोषस्तत्र ते वासो न बाधस्तत्र कस्यचित्॥ **7.3.31** ॥

एतच्छ्रुत्वा स धर्मात्मा धर्मिष्ठं वचनं पितुः।
निवासयामास तदा लङ्कां पर्वतमूर्धनि॥ **7.3.32** ॥

नैर्ऋतानां सहस्रैस्तु हृष्टैः प्रमुदितैः सदा।
अचिरेणैव कालेन सम्पूर्णा तस्य शासनात्॥ **7.3.33** ॥

स तु तत्रावसत् प्रीतो धर्मात्मा नैर्ऋतर्षभः।
समुद्रपरिखायां स लङ्कायां विश्रवात्मजः॥ **7.3.34** ॥

काले काले तु धर्मात्मा पुष्पकेण धनेश्वरः।
अभ्यागच्छद् विनीतात्मा पितरं मातरं च हि॥ **7.3.35** ॥

स देवगन्धर्वगणैरभिष्टुत -
स्तथाप्सरोनृत्यविभूषितालयः।
गभस्तिभिः सूर्य इवावभासयन्
पितुः समीपं प्रययौ स वित्तपः॥ **7.3.36** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे तृतीयः सर्गः॥